विनायकांस्ततः पञ्च विश्वनाथं ततो व्रजेत् ।
ततो मौनं विसृज्याथ मन्त्रमेवमुदीरयेत् ॥
अन्तर्गृहस्य यात्रेयं यथावद्या मया कृता ।
न्यूनातिरिक्तया शम्भुः प्रीयतामनया विभुः ॥
इति मन्त्रं समुच्चार्य्य क्षणं वै मुक्तिमण्डपे ।
विश्राम्य यायाद्भवनं निष्पापः पुण्यवान्नरः ॥*॥
संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः ।
कार्य्या यात्रा प्रयत्नेन महापुण्यसमृद्धये ॥
नवम्यां चाष्टम्याञ्च कुलस्तम्भं समर्च्चयेत् ।
दुःखदपिशाचत्वे न भवेदस्य पूजनात् ॥
श्रुत्वा पूर्व्वमिमा यात्राः कर्त्तव्यास्तीर्थवासिभिः ।
पर्व्वस्वपि विशेषेण कार्य्या यात्राश्च सर्व्वतः ॥
न वन्ध्यं दिवसं कुर्य्यात् विना यात्रां क्वचित् कृती ।
यात्रादयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम् ।
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्भुवम् ॥
यस्य वन्ध्यं दिनं जातं काश्यां निवसतः सतः ।
निराशाः पितरस्तस्य तस्मिन्नेव दिनेऽभवन् ।
स दष्टः कालसर्पेण स दष्टो मृत्युना स्फुटम् ।
स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः ॥
सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रां व्यधात् स च ।
मणिकर्ण्यान्तु यः स्नातो यो विश्वेशं निरैक्षत ॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
द्रष्टो विश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका ॥
व्यास उवाच ।
सूत स्कान्दमिमं श्रुत्वा काशीमाहात्म्यमुत्तमम् ।
नरो न निरयं याति हत्वाप्यघसहस्रकम् ॥"
इति काशीखण्डे १०० अध्यायः ॥

वाराणसेयः, त्रि, ( वाराणसी + "नद्यादिभ्यो ढक् ।" ४।२।९७। इति ढक् ।) वाराणसीजातः । वाराणसी शब्दात् णेयप्रत्ययेन निष्पन्नः ॥

वारासनं, क्ली. ( वारां आसनम् । ) जलाधारः । तत्पर्य्यायः । वाःसदनम् २ । इति त्रिकाण्डशेषः ॥

वाराहः, पुं, महापिण्डीतकवृक्षः । इति राजनिर्घण्टः ॥ वराह एव (वराह + स्वार्थे अण् ।) वाराहः । ( कल्पभेदः । यथा, भागवते । ३ । ११ । ३७ ।
"अयन्तु कथितः कल्पो द्वितीयस्यापि भारत ! ।
वाराह इति विख्यातो यत्रासीत् शूकरो हरिः ॥"
वराहस्येदमिति । वराह + तस्येदमित्यण् । ) तत्सम्बन्धिनि, त्रि ॥ (यथा, महाभारते ।२।४।२।
"शाल्येन पायसेनैव मधुना मिश्रितेन च ।
भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वाराहहारिणैः ॥"
क्ली, तीर्थभेदः । यथा, महाभारते ।३।८३।१८।
"ततो गच्छेत धर्म्मज्ञ ! वाराहं तीर्थमुत्तमम् ।
विष्णुर्वाराहरूपेण पूर्व्वं यत्र स्थितोऽभवत् ॥"
पुराणविशेषः । यथा, देवीभागवते । १।३।८ ।
"चतुर्व्विंशतिसाहस्रं वाराहं परमाद्भुतम् ॥")

वाराहकर्णी, स्त्री, (वाराहकर्ण इव पत्रमस्यस्याः । वाराहकर्ण + अच् । गौरादित्वात् ङीष् । ) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहपत्री, स्त्री, ( वाराहस्तत्कर्ण इव पत्रमस्यस्याः । अच् । गौरादित्वात् ङीष् । ) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहाङ्गी, स्त्री, (वाराहमिवाङ्गमस्याः । ङीष् ।) दन्तीवृक्षः । इति भावप्रकाशः ॥

वाराही, स्त्री, ( वाराह + ङीष् । ) ब्रह्माण्याद्यष्टमातृकान्तर्गतमातृकाविशेषः । यथा,—
"वराहरूपधारी च वराहोपम उच्यते ।
वाराहजननी चाथ वाराही वरवाहना ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥
योगिनीविशेषः । यथा,—
"दुर्गा चण्डेश्वरी चण्डी वाराही कार्त्तिकी तथा ।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा ॥
भद्रकाली विशालाक्षी भैरवी कामरूपिणी ।
एताः सर्व्वाश्च योगिन्यो भृङ्गारैः स्नापयन्तु ते ॥"
तीर्थविशेषः । यथा,—
"वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुर्भैरवसागराः ।
पञ्चस्नानविधानाय सान्निध्यमिह कल्पय ॥"
इति हयशीर्षिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥
वराहदेवस्य शक्तिः । यथा,—
"यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥"
इति चण्डी ॥
अपि च ।
"वाराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ।
शुभदां सुप्रभां शुभ्रां वाराहीं तां नमाम्यहम् ॥"
इति हयशीर्षिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥
वराहक्रान्ता । चामालु इति ख्यातः । तत्पर्य्यायः । विष्वक्सेनप्रिया २ गृष्टिः ३ वदरा ४ । इत्यमरः ॥ गृष्टिः ५ । इति भरतः ॥ शूकरी ६ क्रोड़कन्या ७ विष्वक्सेनकान्ता ८ वराही ९ कौमारी १० त्रिनेत्रा ११ ब्रह्मपुत्त्री १२ क्रोड़ी १३ कन्या १४ गृष्टिका १५ माधवेष्टा १६ शूकरकन्दः १७ क्रोड़ः १८ वनवासी १९ कुष्ठनाशनः २० वल्यः २१ अमृतः २२ महावीर्य्यः २३ महौषधम् २४ भ्रमरकन्दः २५ वराहकन्दः २६ वीरः २७ ब्राह्मीकन्दः २८ सुकन्दः २९ सुहितः ३० व्याधिहन्ता ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । विषपित्तकफकुष्ठप्रमेहकृमिनाशित्वम् । वृष्यत्वम् । वल्यत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।
"वाराहीकन्द एवान्यैश्चर्म्मकारालुको मतः ।
अनूपे स भवेद्देशे वाराह इव लोमवान् ॥"
इति भावप्रकाशः ॥
श्यामापक्षी । इति राजनिर्घण्टः ॥ मेदिनीमते पवर्गीयबकारादिरयं शब्दः ॥

वारि, क्ली, ( वारयति तृषामिति । वृ + णिच् + "वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।" उणा० ४ । १२४ । इति इञ् । ) जलम् । इत्यमरः । १ । १० । ३ ॥ ( यथा, मनौ । ४ । ६३ ।
"न कुर्व्वीत वृथा चेष्टां न वार्य्यञ्जलिना पिबेत् ।
नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात् कुतूहली ॥")
दिग्विशेषे तस्य निषेधविधौ यथा,—
"ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
जलक्रीड़ायां वर्णनीयानि यथा,—
"जलकेलौ सरःक्षोभचक्रहंसापसर्पणम् ।
पद्मम्लानिपयोविन्दुहाराङ्गभूषणच्युतिः ॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥
ह्रीवेरम् । इति हेमचन्द्रः ॥

वारिः, स्त्री, ( वारयतीति । वारि + इन् । ) वाक् । सरस्वती । गजबन्धनी । हस्तिबन्धनभूमिः । ( यथा, रघौ । ५ । ४५ ।
"संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन् बृहतस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")
वल्दिः । कण्टीति भाषा । इति मेदिनीकारहेमचन्द्रौ ॥ ( वरणीये, त्रि । यथा, वाजसनेयसंहितायाम् । २१ । ६१ ।
"वसुभ्य आ सङ्गतेभ्य एष मे देवेषु वसु वार्य्यायक्ष्यते ।"
"एषोऽग्निर्मेमस्त्वं देवेषु वारि वरीतुं योग्यं वारि वरणीयं वसु धनमायक्ष्यते ।" इति तद्भाष्ये महीधरः ।)

वारिकण्टकः, पुं, (वारिणः कण्टक इव । ) शृङ्गाटकः । इति जटाधरः त्रिकाण्डशेषश्च ॥

वारिकर्णिका, स्त्री, ( वारिषु कर्णा इव पत्राण्यस्याः । गौरादित्वात् ङीष् । स्वार्थे कन् । टाप् पूर्व्वह्रस्वश्च । ) खम्भूली । इति शब्दरत्नावली ॥ पाना इति भाषा ॥

वारिकर्पूरः, पुं, ( वारिषु कर्पूर इव । ) इल्लिशमत्स्यः । इति त्रिकाण्डशेषः ॥

वारिकुब्जः, पुं, ( वारिषु कुब्ज इव वक्रत्वात् । ) शृङ्गाटकः । इति शब्दरत्नावली ॥

वारिकुब्जकः, पुं, ( वारिकुब्ज + स्वार्थे कन् । ) शृङ्गाटकः । इति त्रिकाण्डशेषः ॥

वारिकृमिः, पुं, ( वारिणः कृमिः । ) जलौकाः । इति त्रिकाण्डशेषः ॥

वारिचत्वरः, पुं, ( वारिणि चत्वर इव । ) कुम्भिका । इति त्रिकाण्डशेषः ॥

वारिचरः, पुं, ( वारिषु चरतीति । चर + टः । ) मत्स्यः । इति धनञ्जयः ॥ ( यथा, भागवते । ६ । ९ । २३ ।
"यस्योरुशृङ्गे जगतीं स्वनावं
मनुर्यथाबध्य ततार दुर्गम् ।
स एव नस्त्वाष्ट्रभयाद्दुरन्तात्
त्राताश्रितान् वारिचरोऽपि नूनम् ॥")